# अध्याय :- ३९ Chapter-39

नारद उवाच ।।[१]

सहस्त्रसप्तत्युच्छ्राये पातालानि परस्परम् ।।
अतलं वितलं चैव नितलं च रसातलम् ।। १

तलातलं च सुतलं पातालं चापि सप्तमम् ।।
कृष्ण शुक्लारुणाः[२] पीताः शर्कराशैल कांचनाः ।। २

भूमयो यत्र कौरव्य वरप्रासाद शोभिताः ।।
तेषु दानवदैत्यनागाश्चैव सहस्त्रशः ।। ३

स्वर्लोकादपि रम्याणि दृष्टानि बहुशो मया ।।
आह्लाय कारिणो नानामण्यो यत्र पन्नगाः ।। ४

दैत्य दानव कन्या भिर्महारूपाभिरन्विते ।।
पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते ।। ५

यत्र नोष्णं न वा शीतं न वर्षं दुःखमेव च ।।
भक्ष्य भोज्यमहाभोगकालो यत्रापि जायते ।। ६

पाताले सप्तमे चास्ति लिंगं श्री हाटकेश्वरम् ।।
ब्रह्मणा स्थापितं पार्थ सहस्त्रयोजनोच्छ्रितम् ।। ७

---

१ ब. श्री नारद उ० ।।
२ ब. रुण

हाटकस्य तु लिंगस्य प्रासादो योजनायुतः[1] ।।
सर्वरत्नमयो दिव्यो नानाश्चर्य विभूषितः ।। ८

तच्चार्चयंति तल्लिंगं नानानागेन्द्रसत्तमाः ।।
तदधस्ताज्जलं भूरि तस्याधो नरकाः स्मृताः ।। ९

पापिनो येषु पात्यंते तांछृणुष्व महामते ।।
कोटयः पंचपंचाशद्राजानश्चैक विंशति ।। १०

रौरवः शूकरो रोधस्तालो विशसनस्तथा ।।
महाज्वालास्तप्त कुम्भो लवणोथ विमोहकः ।। ११

रुधिरांधो वैतरणी कृमिशः कृमि भोजनः ।।
असिपत्रवनं कृष्णो लालाभक्ष्यश्च दारुणः ।। १२

तथा पूयवहः पापी वह्निज्वालोऽप्यधः शिराः ।।
संदंशः कृष्ण सूत्रश्च तमश्चावीचिरेव च ।। १३

श्वभोजनो विसूचिश्चाप्य वीचिश्च तथाऽपरः ।।
कूटसाक्षी रौरवं च रौधं गोविप्ररोधकः ।। १४

---

१ ब. योजयुनातः
२ ब. स च

सुरापः सूकरं[1] याति तालं मिथ्यामनुष्य हा ।।
गुरु तल्पी तप्तकुम्भं तप्तलोहं च भक्त हा ।। १५

गुरूणामवमंता यो महाज्वाले निपात्य ते ।।
लवणं शास्त्रहंता च निर्मर्यादो विमोहके ।। १६

कृमि भक्ष्ये देवद्रुष्टा कृमिशे तु दुरिष्टकृत ।।
पितृदेवात्पूर्वमश्नल्लां लाभक्ष्ये प्रयाति च ।। १७

[2]मिथ्याजीव विरोधी विशसने कूटशास्त्र कृत् ।।
अधो‿मुखे ह्यसद्ग्राही एकाशी पूयवाहके ।। १८

मार्ज्जार कुक्कुटश्वानपक्षिपोष्य प्रयाति च ।।
बधिरांध गृह क्षेत्रतृणधान्यादिज्वालकः ।। १९

नक्षत्र रंगजीवि च याति वैतरणीं नरः ।।
धनयौवनमत्तो यो धनहा कृष्णमेति सः ।। २०

असिपत्रवनं याति वृक्षच्छेदी वृथैव यत् ।।
कुहकाजीविनः सर्वे वह्निज्वाले पतंति ते ।। २१

---

१ ब. शूकरे

२ ब "मिथ्या...... कृत् " ।। बं. प्रतौ नास्ति ।।

परस्त्रीं च परान्नं च गच्छन्संदंशमेति च ।।
दिवास्वप्नपरा ये च व्रत लोपमराश्च ये ।। २२

शरीर मदमत्ताश्च यांति चैते श्वभोजनम् ।।
शिवं च हरिं न मन्यंते यांत्यवीचिनमेव च ।। २३

इत्येवमादिभिः पापैरशास्त्रौधस्य सेवनैः ।।
पतंत्येव महाघोरनरकेषु सहस्त्रशः ।। २४

तस्माद्य इच्छेदेतेभ्यो विमोक्षं बुद्धिमान्नरः ।।
श्रुतिमार्गेण तेनार्च्यौ देवौ[1] हरिहरावुभौ ।। २५

नरकाणामधो‿भागे स्थितः कालाग्निसंज्ञकः ।।
तदधो हट्टकश्चैव अनंतस्तदधः स्मृतः ।। २६

यस्यैतत्सकलं विश्वं मूर्घाग्रे सर्षपायते ।।
इत्यनंत प्रभावात्स ह्यनंत इति कीर्त्यते ।। २७

दिशां गजास्तत्र पद्मकुमुदां जन‿वामनाः ।।
तदधोऽडकटाहश्च एकवीरास्ति तत्र च ।। २८

---

१ ब॰ देवी

चतुर्लक्ष सहस्त्राणि नवतिश्च शतानि च ।।
एतेनैव प्रमाणेन उदकं च ततः स्मृतम् ।। २९

तदधो नरकाः[१] कोटयो द्विकोटयो ग्निस्ततो महान्[२] ।।
चत्वारिंशत्सहस्त्रैवश्च तदधस्तम उच्यते ।। ३०

चत्वारिंश च्च कोटयस्तु चतस्त्रश्च ततः पराः ।।
एकोननवतिर्लक्षाः सहस्त्राशीतरेव च ।। ३१

तदधो डकटाहोथ कोटिमात्रस्तथा परः ।।
देवी युक्ता कपालीशा दंडहस्तेन चापि सा ।। ३२

देवीनां कोटि कोटीभिः संवृता वत्र[३] पालिनी[४] ।।
संकर्षणास्य निःश्वास प्रेरितो दाहको नलः ।। ३३

कालाग्निं प्रेरयत्येव कल्पांते दह्यते जगत् ।।
एवंविधमधः सूत्रं निर्मितं चात्र भारत ।। ३४

मध्यसूत्रे[५] कटाहे च पालकांस्तांछृणुष्व मे ।।
वसुधामा स्थितः पूर्वे शंखपालश्च दक्षिणे ।। ३५

---

१ ब. नरकौ
२ ब. महात्
३ ब. तत्र
४ ब. पानिनी
५ ब. मध्यलोक

तक्षकेशः स्थितः पश्चादुत्तरे केतुमानिति ।।
हरसिद्धिः सुपर्णाक्षी भास्करा योगनंदिनी ।। ३६

कोटिकोटीयुता देवी देवीनां पालयत्पदः ।।
एवमेतन्महाश्चर्यं ब्रह्मांडं स्थापितं [1]ब्र च यैः ।। ३७

नमामि तानहं नित्यं ब्रह्माविष्णु महेश्वरान् ।।
विष्णुलोको रुद्रलोको बहिश्चास्मात्प्रकीर्त्यते ।। ३८

तं च वर्णयितुं ब्रह्मा शक्तो नैवास्मदादयः ।।
विमुक्ता यत्र संयांति नित्यं हरिहर[2]व्रताः ।। ३९

ब्रह्मांडं संवृतं ह्येतत्कटाहेन समंततः ।।
कपित्थस्य यथा बीजं कटाहेन सुसंवृतम् ।। ४०

दशोत्तरेण पयसा वृतं तच्चापि तेजसा ।।
तेजश्च वायुना वायुर्नभसाहंतया च तत् ।। ४१

अहंकारश्च महता तं चापि प्रकृतिः परा ।।
दशोत्तराणि सर्वाणि षडाहुः सप्तमं च तत् ।। ४२

---

१ ब. व यैः
२ ब. वृता

प्राकृतं चरणं पार्थ तदनंतं प्रकीर्तितम् ।।
अंडानां तु सहस्त्राणां सहस्त्राण्ययुतानि च ।। ४३

ईदशानां तथा चात्र कोटि कोटिशतानि च ।।
सर्वाण्येवं विधान्येव यादृशं कीर्तितं त्विदम् ।। ४४

यस्यैवं वैभवं पार्थ तं नमामि सदाशिवम् ।।
अहो मंदः स पापात्मा को वा तस्माद चेतनः ।। ४५

य एवंविध संमोह तारकं न शिवं भजेत ।।
अथ ते कीर्तयिष्यामि कालमानं [1]निबोध तत् ।। ४६

काष्ठा निमेषा दश पंच चाहुस्त्रिंशच्च गणयेत्कला हि ।।
त्रिंशत्कलाश्चापि भवेन्मुहूर्तं तत्त्रिंशतारात्र्यहूनी उभे च ।। ४७

दिवसे पंचकालाः स्युस्त्रिमुहूर्ताः शृणुष्व तान् ।।
प्रातस्ततः संगवश्च मध्याह्नश्चापराहृणकः ।। ४८

सायाह्नः पंचमश्चापि मुहूर्तादिश पंच च ।।
अहोरात्राः पंचदश पक्ष इत्यभिधीयते ।। ४९

---

१ ब. निबोधत ।।

मासः पक्षद्वयेनोक्तौ द्वौ मासौ चार्कजावृतुः[1] ।।
ऋतुत्रयं चाप्ययनं द्वयने वर्षमुच्यते ।। ५०

चतुर्भेदं मासमाहु पंचभेदं च वत्सरम् ।।
संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।। ५१

इद्वत्सरस्तृतीयोऽसौ चतुर्थश्चानुवत्सरः ।।
पंचमश्च युगोनाम गणनानिश्चयो हि सः[2] ।। ५२

मासेन च मनुन्याणामहोरात्रं च पैतृकम् ।।
कृष्णपक्षस्त्वहः प्रोक्तः शुक्लपक्षश्च शर्वरी ।। ५३

मानुष्येण च वर्षेण दैविको दिवसः स्मृतः ।।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ।। ५४

वर्षेण चैव देवानां मतः सप्तर्षि वासरः ।।
सप्तर्षीणां च वर्षेण ध्रौवश्च दिवसः स्मृतः ।। ५५

मनुष्याणां च वर्षाणि लक्षसप्तदशैव तु ।।
अष्टाविंशतिसहस्त्राणि कृतं त्रेतायुगं ततः ।। ५६

---

१ ब. चार्कजौऋतुः ।।
२ ब. तः

लक्षद्वादशसाहस्त्रषण्णवत्यधिकाः परः ।।
अष्टौ लक्षाश्चतुः षष्टि सहस्त्राणि च द्वापरः ।। ५७

चतुर्लक्षं तु द्वात्रिंशत्सहस्त्राणि कलिः[1] स्मृतः ।।
चतुर्भिरे तैर्देवानां युगमित्यभिधीयते ।। ५८

आयुर्मनोर्युगानां च साधिका ह्येकसप्ततिः ।।
चतुर्दशमनूनां च कालेन ब्रह्मणो दिनम् ।। ५९

युगानां च सहस्त्रेण स च कल्पः श्रृणुष्व तान् ।।
भवोद्भवस्तपोभत्य ऋतुर्वह्निर्वराहकः ।। ६०

सावित्र आसिकश्चापि गांधारः कुशिकस्तथा ।।
ऋषभश्च तथा खड्गो गांधारीयश्च मध्यमः ।। ६१

वैराजश्च[2] निषादश्च मेघवाहन पंचमौ ।।
चित्रको ज्ञान आकूतिर्मीनो दंशश्च बृंहकः ।। ६२

श्वेतो[3] लोहितक्तो च पीतवासाः शिवः[4] प्रभुः ।।
सर्वरूपश्च मासोऽयमेवं वर्षशतावधिः[5] ।। ६३

---

१ ब. कलि

२ ब. विराजश्च

३ ब. श्वेत

४ ब. प्रती "सितः" पाठः ।

५ ब. .... विधिः

पूर्वार्धमपरार्धं च ब्रह्ममानमिदं स्मृतम् ।।
विष्णोश्च शंकरस्यापि नाहं शक्तश्च वर्णने ।। ६४

क्वाहमल्पमतिः पार्थ क्वापरौ हरित्र्यंबकौ ।।
दैविकेनैव मानेन पातालेष्वपि गण्यते ।। ६५

इति ते सूचितं बुद्ध्या शृणु तत्प्राकृतं पुनः ।। *१ ६६

[२]इति वैधात्र्यव्यवस्थितिः ।। श्री नारद उवाच ।।
ऋषभोनाम यन्नाम्ना नानापाषंड कल्पनाः ।।
कलौ पार्थ भविष्यंति लोकानां मोहनात्मिकाः ।। ६७

तस्य पुत्रस्तु भरतः शतशृंगस्तु तत्सुतः ।।
तस्य पुत्राष्टकं जातं तथैका च कुमारिका ।। ६८

इंद्रद्वीपः[३] कसेरुश्च ताम्रद्वीपो गभस्तिमान् ।।
नागः[४] सौम्यश्च गांधर्वो वरुणश्च कुमारिका ।। ६९

वदनं चापि कन्यायाः पार्थ बर्करिकाकृति ।।
शृणु तत्कारणं सर्वं महाश्चर्यं समन्वितम् ।। ७०

---

* १ ब. इति श्री स्कंदपुराणे कुमारिकाखंडे वैधिव्यवास्थितिर्नाम-
-अष्टत्रिंशोऽध्यायः ।।

२ ब. 'इति......स्थितः' । इत्ययं पाठः नास्ति ।

३ ब. प

४ ब. नाग

महीसागरपर्यंते[१] वृक्षराजि[२]विराजिते ।।
जालीगुल्म लताकीर्णे स्तंभ तीर्थस्य संनिधौ ।। ७१

अजासमजती मध्यात्काचिदेका च बर्करी ।।
भ्रांता सती समायाता प्रदेशे तत्र दुश्चरे ।। ७२

इतस्ततो भ्रमंती सा जालिमध्ये समंततः ।।
निर्गंतुं नैव शक्नोति क्षुत्पिपासार्दिता शुभा ।। ७३

विलग्ना जालिमध्ये तु ततः पंचत्वमागता ।।
कालेन कियता तस्य त्रुटित्वा शरिसो ह्यधः ।। ७४

पपात शनिदर्शे च महीसागर संगमे ।।
सर्वतीर्थमये तत्र सर्वपाप प्रमोचने ।। ७५

शिरस्तु तदवस्थं हि समग्रं तत्र संस्थितम् ।।
जालिगुल्मावलग्नं च तस्या नैवापतज्जले ।। ७६

शेषकायप्रपातेन महीसागर संगमे ।।
तत्तीर्थस्य प्रभावेन बर्करी सा कुरुद्वह ।। ७७

---

१ ब. ते
२ ब. च जायते ।।

शतश्रृंगस्य वै राज्ञः सिंहलेष्व भवत्सुता ।।
मुखं बर्करिका तुल्यं व्यक्तं तस्या व्यजायत ।। ७८

दिव्यनारी शुभाकारा शेषकाये ह्यभी शुभा ।।
पूर्वं तस्याप्यपुत्रस्य राज्ञः पुत्रशतोपमा ।। ७९

पुत्री जाता प्रमोदेन स्वजनानंद वर्धिनी ।।
तत[1]स्तस्या विलोक्याथ मुखं बर्करिकाकृति ।। ८०

विस्मयं समनुप्राप्ताः सर्वे ते राजपुरुष्काः ।।
विषादं [2]परमापन्नो राजा सांतः पुरस्तदा ।। ८१

खिन्नाः प्रकृतयः सर्वास्तादृग्रूप विलोकनात् ।।
तत्किमित्येतदाश्चर्यं मूचुः [3]पौराः सुविस्मिताः ।। ८२

ततः सा यौवनं प्राप्ता साक्षाद्देवसुतोपमा ।।
स्वमुखं दर्पणे वीक्ष्य स्मृतः पूर्वो भवस्तया ।। ८३

तत्तीर्थस्य प्रभावेण मातृपित्रो निर्वेदितम् ।।
विषादो नैव कर्तव्यो मदर्थे तात निश्चितम् ।। ८४

---

१ ब "तत" अ क प्रतौ नास्ति ।

२ अ. प्रतौ नास्ति ।

३ अ. श्लोकार्ध लुप्तम् (पौरा..... ताः )

*[1]मां शोकं कुरु मे मातः पूर्वजन्मार्जितं फलम् ।।
ततः पूर्वं स्ववृत्तांत मुक्त्वा सा च कुमारिका[2] ।। ८५

पूर्वजन्मोद्भवः कायस्तस्या यत्रावतत्तथा ।।
गमनाय तमुद्देशं विज्ञप्तौ पितरौ[3] तया[4] ।। ८६

अहं तात गमिष्यामि महीसागरसंगमम्[5] ।।
भवामि तत्र संप्राप्ता यथा कुरु तथा नृप ।। ८७

ततः पित्रा प्रतिज्ञातं शतशृंगेण तत्तथा ।।
तस्याः संवाहनं चक्रे राजा प्रीतैः सरत्नकैः ।। ८८

स्तंभतीर्थं ततः साऽपि प्राप्य प्रीतार्थ संयुता।।
भूरिदानं ततश्चक्रे दानं सर्वस्वलक्षणम् ।। ८९

जालिगुल्मांतरेऽन्विष्य ततो द्रष्टं निजं शिरः ।।
अस्थिचर्मविशेषं च तदादाय प्रयत्नतः ।। ९०

दग्ध्वा संगमसांनिध्ये क्षिप्तान्यस्थीनि संगमे ।।
ततस्तीर्थ प्रभावेण मुखं जातं शशिप्रभम् ।। ९१

---

* १ अ. "मां..... फलम्" पर्यन्तं त्रुटितं ।
२ ब. कुमारिकाः
३-४ बं पितरौ दया
५ ब. मे

न तादग्देवकन्यानां न तादङ्नागयोषिताम् ।।
न तादङमर्त्यनारीणां तस्या यादङमुखं मुखम् ।। १२

सुरासुरनराः सर्वे तस्यारूपेण मोहिताः ।।
बहुधा प्रार्थयंत्येनां न सा वरमभिप्सति ।। १३

[1]कष्टं तया मुदा तत्र प्रारब्धं [illegible] दुश्चरं तपः ।।
ततः संवत्सरे पूर्णे देवदेवो महेश्वरः ।। १४

प्रत्यक्षतां [2]गतस्तस्यै वरदोऽस्मीति चाब्रवीत् ।।
ततस्तं पूजयित्वा च कुमारी वाक्यम ब्रवीत् ।। १५

यदि तुष्टोऽसि देवेश यदि देयो वरो मम् ।।
सांनिध्यं क्रियतामत्र सर्वकालं हि शंकर[3] ।। १६

एवमस्तित्वति शर्वेण प्रोक्ते त्दष्टा कुमारिका ।।
यत्र दग्धं शिरस्तस्या बर्कर्याः[4] कुरुसत्तम् ।। १७

बर्करेशः शिवस्तत्र तया संस्थापितस्तदा ।।
मन्मुखा न्महदाश्चर्यं श्रुत्वेदं च तलातलात् ।। १८

---

१ अ. 'कष्टं ........ तत्र' पर्यन्तं त्रुटितं ।
२ 'गत........ब्रवीत्' अ. पुस्तके लुप्तम् ।
३ ब. शंकरः
४ ब. बर्कर्या

स्वस्तिकोनाम नागेंद्रः कुमारीं द्रष्टमागतः ।।
शिरसो गच्छता तेन यत्रोत्क्षिप्ता च भूरभूत ।। ९९

ईशाने बकरेशस्य कूपो भूत्स्वस्तिकाभिधः ।।
पूरितो गंगया पार्थ सर्व तीर्थ फलप्रदः ।। १००

दृष्ट्वा च स्थापितं लिंगं शिवस्तुष्टो वरं ददौ ।।
येषां मृत शरीराणामत्र दाहः प्रजायते ।। १०१

*१ क्षिप्यंतिबुधौ तथा स्थीनि तेषां स्यादक्षया गतिः ।।
ते स्वर्गे * सुचिरं कालं वसित्वात्र समागताः ।। १०२

राजानः सर्व संपूर्णाः सप्रतापा भवंति ते ।।
बकरेशं च यो भक्त्या संपूजयति मानवः ।। १०३

स्नात्वर्णव[२] महीतोये तस्य स्यान्मनसेप्सितम् ।।
कार्तिके च चतुर्दश्यां कृष्णायां श्रद्धयान्वितः ।। १०४

कूपे स्नानं नरः कृत्वा[३] संतर्प्य च पितृन्निजान् ।।
पूजयेद्बकरेशं यः सर्वपापैः स[४] मुच्यते ।। १०५

---

* १ प्रक्षिप्त सागरास्थीतां तेषां स्याय क्षयागतिः ।। अ. पाठः ।
२ ब. तोय
३ ब. स्नात्वा
४ स अ. प्रतौ नास्ति

एवं लब्ध्वा वरान्सर्वान्सा पुनः सिंहलं ययौ ।।
शतशृङ्गाय पित्रे च वृतातं स्वं न्यवेदयत् ।। १०६

अ तच्छ्रुत्वा विस्मितो राजा लोकाः सर्वे च फाल्गुन ।।
प्रशशंसुर्महीं तीर्थ माजग्मुश्च कृतादराः ।। १०७

स्नात्वा दत्त्वा[१] च दानानि विविधानी च ते ततः ।।
सिंहलं च ययुर्भूयस्तीर्थ माहात्म्यहर्षिताः ।। १०८

अनिच्छंत्यां कुमार्यां च वरं द्रव्यं च पार्थिव ।।
तथान्यदपि प्रीत्यासौ ययदौ नृपतिः श्रुणु ।। १०९

इदं भारतखंडं[२] च नवधैव विभज्य सः ।।
ददावष्टौ स्वपुत्राणां कुमार्यैः नवमं तथा ।। ११०

तेषां[३] विभेदान्वक्ष्यामि पर्वतैरुपशोभितान् ।।
पुत्रनामानि वर्षाणि पर्वतांश्च श्रुणुष्व मे ।। १११

महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।।
विंध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ।। ११२

---

१ अ. 'तत्र' इति स्यात् ।
२ अ. ब. भरतखंडं
३ अ. तस्यां

महेन्द्रपरतश्चैव इन्द्रद्वीपो निगद्यते ।।
पारियात्रस्य चैवार्वाकखण्डं कौमारिकं स्मृतम्[1] ।। ११३

सहस्त्रमेकमेकं च सर्वखण्डान्यमूनि च ।।
नदीनां संभवं चापि संक्षेपाच्छृणु फाल्गुन ।। ११४

वेदस्मृतिमुखा नद्यः पारियात्रोद्भवा मताः ।।
नर्मदा सरसाद्याश्च नद्यो विंध्याद्रिनिर्गताः ।। ११५

शतद्रूचन्द्रभागाद्या ऋक्षपर्वतसंभवाः ।।
ऋषिकुल्याकुमार्याद्याः शुक्तिमत्पाद संभवाः ।। ११६

तापी पयोष्णी निर्विंध्या कावेरी च महीनदी ।।
कृष्णा वेणी[2] भीमरथी सह्यपादोद्भवाः स्मृताः ।। ११७

कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।।
त्रिसामऋष्यकुल्याद्या महेन्द्र प्रभवाः स्मृताः ।। ११८

एवं विभज्य पुत्रेभ्यः कुमार्यै च महीपतिः ।।
[3]शतशृंगी गिरिं गत्वा उदीच्यां तप्तवांस्तपः ।। ११९

---

१ ब. त्विदं
२ अ. वेणा
३ अ. शतशृंग शृंगा

तत्र तप्त्वा तपो घोरं ब्रह्मलोकं जगाम सः ।।
शतश्रृंगो नृपश्रेष्ठः शतश्रृंगे नगोत्तमे ।। १२०

यत्र जातोऽसि कौंतेय पांडोस्त्वं सोदरैः सह ।।
कुमारी च महाभागा स्तंभतीर्थे स्थिता सती ।। १२१

खंडोद्भवेन द्रव्येण तेपे दानानि यच्छती ।।
ततः केनापि कालेन भ्रातृभ्योऽष्टभ्य एव च ।। १२२

महावीर्य बलोत्साहा जाता नव नवात्मजाः ।।
ते समेत्य समागम्य[1] कुमारीं प्रोचिरे ततः ।। १२३

कुलदेवी त्वमस्माकं प्रसादं कुरु नः शुभे ।।
अष्टौ खण्डानि चास्माकं विभज्य स्वयमेव च ।।
देहि द्वासप्ततीनां नो विभेदः स्याद्यथा नृनः ।। १२४

इत्युक्ता सर्वधर्मज्ञा विज्ञाने [2]ब्रह्मणा [3]समा ।।
द्वासप्ततिविभेदैः सा नव खंडान्य चीकरत् ।। १२५

तेषां नामानि ग्रामवं पत्तनानि च फाल्गुन ।।
वेलाकूलानि संख्यां च वक्ष्यामि तव तत्त्वतः ।। १२६

---

१ अ. गत्य

२-३ अ. ब्रह्मणः समाः

कोटिश्चतस्त्रो ग्रामाणां नीवृदासीच्च मंडले ।।
सार्ध कोटिद्वय ग्रामैर्देशो बालाक[१] उच्यते ।। १२७

सपाद कोटिग्रामाणां पुरसाहणके[२] विदुः ।।
लक्षाश्चत्वार एवापि ग्रामाणामंधलेस्मृताः ।। १२८

एको लक्षश्च नेपाले ग्रामाणां परिकीर्तितः ।।
षट्त्रिंशल्लक्षमानं तु [३]कान्यकुब्जे प्रकीर्तितम् ।। १२९

[४*] द्वासप्ततिस्तथा लक्षा ग्रामा गाजणके स्मृताः ।।
अष्टादश तथा लक्षा ग्रामाणां गौडदेश के ।। १३०

कामरूपे च ग्रामाणां नवलक्षाः प्रकीर्तिताः ।।
डाहले वेदसंज्ञे तु ग्रामाणां नवलक्षकम् ।। १३१

नवैव लक्षा ग्रामाणां कांतिपुरे प्रकीर्तिताः ।।
[५*]नवलक्षास्तथा चैव माचिपूरे प्रकीर्तिताः ।। १३२

औड्डियाणे तथा देशे नवलक्षाः प्रकीर्तिताः ।।
जालंधरे तथा देशे नवलक्षाः प्रकीर्तिताः ।। १३३

---

१ ब. वालाक
२ अ. खुर साहनके
३ अ. ब. कन्य
*४ अ. 'द्वासप्त......स्मृताः' श्लोकपंक्ति नष्टः ।
*५ अ. 'नवल...... प्रकीर्तिता' श्लोकपंक्ति नष्टः ।

लोहपुरे तथा देशे लक्षाः प्रोक्ता नवैव च ।।
ग्रामाणां सप्तलक्षं च पांबीपुरी प्रकीर्तितम् ।। १३४

ग्रामाणां सप्तलक्षं च रटराजे प्रकीर्तितम् ।।
हरीआले च ग्रामाणां लक्षपंचक संमितम् ।। १३५

सार्धलक्षत्रयं प्रोक्तं द्रडस्य विषये तथा ।।
सार्धलक्षत्रयं प्रोक्तं तथा वर्धणवाहके ।। १३६

एकविंशति साहस्त्रं ग्रामाणां कीलपूरके ।।
तथामलविषये पार्थ ग्रामाणामेकलक्षकम् ।। १३७

नरेंदुनामदेशे तु लक्षमेकं सपादकम् ।।
अतिलांगलदेशे च लक्षः प्रोक्तः सपादकः ।। १३८

लक्षाष्टदशसाहस्त्रं नवती द्वे च मालवे ।।
[1]सयंभरे तथा देशे लक्षः प्रोक्तः सपादकः ।। १३९

*[2] मेवाडे च तथा प्रोक्तो लक्षश्चैकः सपादकः ।।
अशीतिश्च सहस्त्राणि वागुरिः परिकीर्तितः ।। १४०

---

१ 'स्वयंभरिस्त तथा देशा' अ. पाठः ।
* २ अ. 'मेवाडे..... परिकीर्तितः' पर्यन्तं त्रुटितं ।

ग्रामसप्ततिसाहस्त्री[1] गुर्जरात्रः प्रकीर्तितः ।।
तथा सप्तति साहस्त्रः पांडोर्विषय एव च ।। १४१

जहाहूति सहस्त्राणि द्वाचत्वारिंशदेव च ।।
अष्टषष्टि सहस्त्राणि प्रोक्तं काश्मीर मंडलम् ।। १४२

षष्टित्रिंशत्सहस्त्राणि ग्रामाणां कौंकणे विदुः ।।
चतुर्दश शतं द्वे च विंशतीलघुकौंकणम् ।। १४३

सिंधुः सहस्त्रदशकं ग्रामाणां परिकिर्तितः ।। १४४

चतुर्दशशते द्वे च विंशतिः कच्छमंडलम् ।।
पंचपंचाशत्सहस्त्रं ग्रामाः सौराष्ट्रमुच्यते ।। १४५

एकविंशतिसाहस्त्री लाडदेशः[2] प्रकीर्तितः ।।
अति सिंधुश्च ग्रामाणां दशसाहस्त्र उच्यते ।। १४६

सहस्त्रदशकं चापि एकपादः प्रकीर्तितः ।। १४७

---

१ ब. साहस्त्र
२ अ. लाटदेशः

तथैव दशसाहस्त्रो देशः सूर्यमुखः स्मृतः ।।
एकबाहुस्तथा देशो दशसाहस्त्र मुच्यते ।। १४८

सहस्त्रदशकं चैव संजायुरिति देशकः ।।
शिवनामा तथा देशः सहस्त्रदशकः[१] स्मृतः ।।
सहस्त्राणि दश ख्यातं तथा कालहृद्यजयः[२] ।। १४९

लिंगोद्भवस्तथा देशः सहस्त्राणि दशैव च ।।
भद्रश्व देवभद्रश्व प्रत्येकं दशकौ स्मृतौ ।। १५०

षट्त्रिंशच्च सहस्त्राणि [३]स्मृतौ चटविराटकौ ।।
षट्त्रिंशच्च सहस्त्राणि यमकोटिः प्रकीर्तिता ।। १५१

अष्टादश तथा कोटया रामको देश उच्चयते ।।
तोमरश्चापि कर्णाटौ मुखवक्र युगलश्व[४] त्रयस्त्विम ।। १५२

सपादलक्षग्रामाणां प्रत्येकं परिकीर्तितः[५] ।।
पंचलक्षाश्व ग्रामाणां स्त्रीराज्यं परिकीर्तितम् ।। १५३

पुलस्त्य विषयश्चापि दशलक्षक उच्यते ।।
प्रत्येकं लक्षदशकौ देशौ कांबोज कोशलौ ।। १५४

---

१ ब. क

२ ब. कलहर्पि

३ अ. श्लोके एतत्स्थाने 'यम कौटि प्रकीर्त्यते'।। इति पठयते ।

४ अ. पंगुलश्व

५ अ. तं

ग्रामाणां च चतुर्लक्षाो बाल्हिकः परीकीर्त्यते ।।
षट्त्रिंशच्च सहस्त्राणि लंकादेशः प्रकीर्तितः ।। १५५

चतुः षष्टिसहस्त्राणि कुरुदेशः प्रकीर्तितः ।।
सार्धलक्षस्तथा प्रोक्तः किरातविजयो जयः[१] ।। १५६

पंच प्राहुस्तथा लक्षान्विदर्भायां च ग्रामकान् ।।
चतुर्दश सहस्त्राणि वर्धमानं प्रकीर्तितम् ।। १५७

सहस्त्रदशकं चापि सिंहलद्वीपमुच्यते ।।
षट्त्रिंशच्च सहस्त्राणि ग्रामाणां पांडुदेशकः ।। १५८

लक्षैकं च तथा प्रोक्तं ग्रामाणां तु[२] भमाणकम्[३] ।।
षट्षष्टिं च सहस्त्राणि देशो मागध उच्यते ।। १५९

[४]षष्टिसहस्त्राणि तथा ग्रामाणां पांगुदेशकः ।।
त्रिंशत्साहस्त्र उक्तश्च ग्रामाणां च वरेंदुकः ।। १६०

पंचविंशति साहस्त्रं मूलस्थानं प्रकीर्तितम् ।।
चत्वारिंशत्सहस्त्राणि ग्रामाणां यावनः[५]स्मृतः ।। १६१

---

१ ब. जय

२ ब. 'च' पाठः ।

३ ब. भयानकं

*४ अ. 'षष्टि......देशकः' श्लोकं नास्ति ।

५ अ. 'च वनः' इति स्यात्

चत्वार्येव सहस्त्राणि पक्षबाहुरुदीर्यते ।।
[1]द्वासप्त ~~ब्रि~~ तिरमी देशाः ग्रामसंख्याः प्रकीर्तिताः ।। १६२

एवं भरतखंडे/स्मिन्षण्णवत्येव कोटयः ।।
द्वासप्ततिस्तथा लक्षाः पत्तनानां प्रकीर्तिताः ।। १६३

षट्त्रिंशच्च सहस्त्राणि वेलाकूलानि भारत ।।
एवं विभज्य खंडानि भ्रातृव्याणां ददौ नव[2] ।। १६४

आत्मीयमपि सा देवी अनिच्छुष्वपि तेषु च ।।
यतो मान्येति भगिनी[3] प्रति कुर्वंति भ्रातरः[4] ।। १६५

भ्रातृन्प्रति भगिनी च विचार्येव ददौ शुभा ।।
तत्कृत्वा सानुमान्यैतान्स्तंभ(तीर्थं)मुपागता ।। १६६

तदा[5] तेषु च देशेषु चतुर्वर्गस्य साधनम्[6] ।।
सर्वेषां प्रवरं प्रोक्तं कुमारीखुवरमेव[7] च ।। १६७

तत्रापि गुप्तक्षेत्रं च वेदैतत्सा कुमारिका ।।
गुप्तक्षेत्रे कुमारेशं पूजयंति महाव्रताः ।। १६८

---

*१ अ. (द्वा.......ताः) श्लोकं नास्ति ।

२ अ. 'नमः'
३ अ. भगिनीं
४ ब. भ्रातरेः
५ अ. ब. 'तदे'
६ ब. साधना
७ अ. कुमारीखंडमेव

तस्थौ ह्रदेषु स्नायंति षट्सुचैवापि संगमे ।।
ततः काल प्रकर्षाच्च प्रसादे स्कंद निर्मिते ।। १६९

जीर्णे नव्यं स्वर्णमयं प्रासादं साप्य कारयत् ।।
ततस्तुष्टो महादेवस्तस्या भक्तयाति तोषितः ।। १७०

कुमारलिंगादुत्थाय प्रत्यक्षस्तामवोचत ।।
भद्रे तवाहं भक्त्या च विज्ञानेन च तोषितः ।। १७१

जीर्णः पुनरुद्धृतोऽयं प्रासादस्तेन तोषितः[1] ।।
तव नाम्ना च विख्यातो भविष्यामि कुमारिके ।। १७२

कर्ता चापि तथोद्धर्ता द्वौ वै समफलौ स्मृतौ ।।
कुमारेशः कुमारीश इति वक्ष्यंति मां ततः ।। १७३

बर्करेशे च ये दत्ता वरां दत्ताः[2] सदैव ये ते ।।
तवापि प्राप्तः कालश्च समीपे वरवर्णिनि ।। १७४

अभर्तृकाया नार्याश्च न स्वर्गमोक्ष एव च ।।
यथैव वृद्धकन्यायाः सरस्वत्यास्तटे शुभे ।। १७५

तस्मात्त्वमत्र तीर्थे च महाकालमिति स्मृतम् ।।
सिद्धिं गतं वृणु भद्रे[3] पतित्वे वरवर्णिनि ।। १७६

---

१ 'ति' अ. पाठः ।
२ 'जायाः' अ. पाठः ।
३ अ. शुभे

ततः सा रुद्रवाक्येन वरयामास तं पतिम् ।।
रुद्रलोकं ययौ[1] चापि महाकालसमन्विता ।। १७७

तत्र तां पार्वती प्राह समालिंग्य प्रहर्षिता ।।
यस्मात्त्वया चित्रवच्च लिखिता पृथिवी शुभे ।। १७८

चित्रलेखेति नाम्ना त्वं तस्माद् भव सखी मम् ।।
ततः सखी सम भवचित्र लेखेति सा शुभा ।। १७९

ययानिरुद्धा कथित[2] ~~उषायाः~~ पतिरुत्तमः ।।
योगिनीनां वरिष्ठा या महाकालस्य वल्लभा ।। १८०

अप्सुसा वार्षिकं बिंदुं पूर्णं वर्षशते पपौ ।।
तपश्चरेती तस्मात्सा प्रोच्यते चाप्सरा दिवि ।। १८१

एवं विधा कुमारी सा लिंगमेत द्धि फाल्गुन ।।
स्थापयामास ~~शिव~~ शिवदं[3] बर्करेश्वर संज्ञितम् ।। १८२

तस्मादत्र नृणां दाहश्चास्थि क्षेपश्च भारत ।।
प्रयागादधिको प्रोक्तो महेस्य वचो यथा ।। १८३

*४ इति श्री स्कंदि...... बर्करेश्वर ~~म~~ माहात्म्यवर्णनं नामैकोन -
- चत्वारिंशोऽध्यायः

---

१ अ. ~~सुभे~~ १ ब. भयं
२ ब. कथितः ३ अ. विशदं
*४ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे बर्करेश्वरमाहात्म्यं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे बर्करेश्वरमाहात्म्ये नवत्रिंशोऽध्यायः ।।
(Here the number is correctly mentioned)